श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनूमन्नवरत्नपद्यमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनूमन्नवरत्नपद्यमाला ॥

श्रितजनपरिपालं रामकार्यानुकूलं
धृतशुभगुणजालं यातुतन्त्वार्तिमूलम्।
स्मितमुखसुकपोलं पीतपाटीरचेलं
पतिनतिनुतिलोलं नौमि वातेशबालम्॥ 1 ॥

दिनकरसुतमित्रं पञ्चवक्त्रं त्रिनेत्रं
शिशुतनुकृतचित्रं रामकारुण्यपात्रम्।
अशनिसदृशगात्रं सर्वकार्येषु जैत्रं
भवजलधिवहित्रं स्तौमि वायोः सुपुत्रम्॥ 2 ॥

मुखविजितशशाङ्कं चेतसा प्राप्तलङ्कं
गतनिशिचरशङ्कं क्षालितात्मीयपङ्कम्।
नगकुसुमविटङ्कं त्यक्तशापाख्यशृङ्कं
रिपुहृदयलटङ्कं नौमि रामध्वजाङ्कम्॥ 3 ॥

दशरथसुतदूतं सौरसास्योद्गगीतं
हतशशिरिपुसूतं तार्क्ष्यवेगातिपातम्।
मितसगरजखातं मार्गिताशेषकेतं
नयनपथगसीतं भावये वातजातम्॥ 4 ॥

निगदितसुखिरामं सान्वितैक्ष्वाकुवामं
कृतविपिनविरामं सर्वरक्षोतिभीमम्।
रिपुकुलकलिकामं रावणाख्याब्जसोमं
मतरिपुबलसीमं चिन्तये तं निकामम्॥ 5 ॥

निहतनिखिलशूरः पुच्छवह्निप्रचारो
द्रुतगतपरतीरः कीर्तिताशेषसारः।
समसितमधुधारो जातपम्पावतारो
नतरघुकुलवीरः पातु वायोः कुमारः॥ **6** ॥

कृतरघुपतितोषः प्राप्तसीताङ्गभूषः
कथितचरितशेषः प्रोक्तसीतोक्तभाषः।
मिलितसखिहनूषः सेतुजाताभिलाषः
कृतनिजपरिपोषः पातु कीनाशवेषः॥ **7** ॥

क्षपितबलिविपक्षो मुष्टिपातातरक्षो
रविजनपरिमोक्षो लक्ष्मणोद्धारदक्षः।
हृतमृतिपरपक्षो जातसीतापरोक्षो
विरमितरणदीक्षः पातु मां पिङ्गलाक्षः॥ **8** ॥

सुखितसुहृदनीकः पुष्पयानप्रतीकः
शमितभरतशोको दृष्टरामाभिषेकः।
स्मृतपतिसुखिसेको रामभक्तप्रवेकः
पवनसुकृतपाकः पातु मां वायुतोकः॥ **9** ॥

अष्टाश्रीकृतनवरत्नपद्यमालां
भक्त्या श्रीहनुमदुरःस्थले निबद्धाम्।
सङ्गृह्य प्रयतमना जपेत् सदा यः
सोऽभीष्टं हरिवरतो लभेत शीघ्रम्॥ **10** ॥

॥ श्री हनूमन्नवरत्नपद्यमाला समाप्ता॥